# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 4th Semester Examinations, 2023

## SANSKRIT

## HISTORY OF VEDIC, SCIENTIFIC AND TECHNICAL LITERATURE IN SANSKRIT

## CORE-8

Time Allotted: 2 Hours | Full Marks: 40

*The figures in the margin indicate full marks.*

### UNIT-I

1. कस्याप्येकस्योत्तरं संस्कृतभाषामाश्रित्य देवनागरीलिप्या लेख्यम् – 10×1 = 10

(क) ऋग्वेदीयसंवादसूक्तानां वैशिष्ट्यं सोदाहरणमालोचनीयम्।

(ख) आरण्यकशब्दस्य का व्युत्पत्तिः ? आरण्यक लक्षणं विचार्य तद्विषयवस्तु संक्षेपेण उपस्थापनीयम्।

(ग) किं नाम वेदाङ्गम् ? कति वेदाङ्गानि ? कानि च तानि ? वेदाङ्गानां संक्षिप्तं विवरणं प्रदेयम्।

2. संस्कृतभाषया देवनागरीलिप्या च एकस्य टिप्पणी कार्या – 5×1 = 5

कठोपनिषद्, शतपथब्राह्मणम्, वृहद्देवता

3. अधोनिर्दिष्टेषु प्रश्नपञ्चकस्य संक्षिप्तमुत्तरं सरलसुरगिरा देवनागरीलिप्या च प्रदेयम् – 1×5 = 5

(क) का नाम ऋक् ?

(ख) को यजुः ?

(ग) वैदिकसाहित्यस्तरचतुष्टयं किम् ?

(घ) ऐतरेयोपनिषत् कस्मिन् वेदे उपलभ्यते ?

(ङ) मनुना वेदस्य किं लक्षणमुक्तम् ?

(च) श्रुतिः कथमुच्यते ?

(छ) अथर्ववेदे कति काण्डानि सन्ति ?

### UNIT-II

4. किमप्येकमुत्तरत – 15×1 = 15

(क) प्राचीनभारतीयायुर्वेदशास्त्रमधिकृत्य नातिदीर्घः प्रबन्धो लेख्यः।

(ख) प्राचीनभारतीयसंगीतशास्त्रचर्चाविषये संक्षिप्ततया विमर्शो विधेयः।

5. अधोनिर्दिष्टेषु पञ्च प्रश्नानामुत्तरं सरलसुरगिरा देवनागरीलिप्या च लेख्यम् – $1\times5 = 5$

(क) आर्यभट्टीयं केन विरचितम् ?

(ख) क आसीद् जीवकः ?

(ग) ज्योतिषशास्त्रस्य कति भेदाः सन्ति ? के च ते ?

(घ) क आसीद् वराहमिहिरः ?

(ङ) सङ्गीतशास्त्रस्य नृत्यविद्याया उत्सरूपेण कस्य ग्रन्थस्य समादरः ?

(च) वास्तुविद्याविषयकग्रन्थद्वयस्य नामोल्लेखं कुरू।

(छ) ब्रह्मस्फुटसिद्धान्तः केन विरचितः ?

——×——